# Prashamamritam

# પ્રશમામૃતમ્

## Document Information

Text title : Prashamamritam

File name : prashamAmRRitam.itx

Category : misc

Location : doc_z_misc_general

Author : Krishnananda Saraswati

Proofread by : Rajesh Thyagarajan

Description/comments : Minor works of Shri Krishnananda Saraswati

Latest update : November 6, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 6, 2025

*sanskritdocuments.org*

# પ્રશમામૃતમ્

વેધા હરિરિતિ હર ઇતિ વાણી કમલાલયેતિ દુર્ગેતિ ।
યસ્ય વિભૂતય એતાસ્તં શિવમખિલોપશમપદં વન્દે ॥ ૧॥

વન્દે વાચાં દેવીં વન્દિજનાનન્દકન્દલીકન્દમ્ ।
પ્રતિબિમ્બિતમિવ દર્પણબિમ્બે યસ્યામિદં જગદ્ભાતિ ॥ ૨॥

યદ્વિજ્ઞાનાલોકેન વ્યવહિતવિપ્રકૃષ્ટસૂક્ષ્માણિ ।
ભાસ્વન્તસ્તે સન્તઃ સ્થેયાઃ સર્વત્ર સંશયે સેવ્યાઃ ॥ ૩॥

મૂકસ્વમપ્રાયં પરિતઃ ખદ્યોતવત્તમોગ્રસ્તમ્ ।
સ્ફુરિતાસ્ફુરિતસ્વપદં જ્ઞાનં યેષાં કૃતોઽઞ્જલિસ્તેષામ્ ॥ ૪॥

અક્લેશકોશસઙ્ગ્રહમનુપગતપ્રકૃતિરઞ્જનક્લેશમ્ ।
અપરિચિતદણ્ડયોગં વૈરાગ્યં કિમપિ જયતિ સામ્રાજ્યમ્ ॥ ૫॥

ભૂયાદિદમિતિ રાગો મા ભૂદિદમિત્યયં પુનર્દ્વેષઃ ।
ઉભયપદાત્યયભાવં વૈરાગ્યં જયતિ સુજનસૌભાગ્યમ્ ॥ ૬॥

ઉપરતિરૌદાસીન્યં પ્રશમો વિજ્ઞાનસમ્પ્રસાદશ્ચ ।
વૈરાગ્યમનાભોગઃ પરમસુખઞ્ચેતિ મુક્તિપર્યાયાઃ ॥ ૭॥

સો નવમો નવમરસઃ શાન્તસ્વાનન્દથુસ્ફુરત્તાત્મા ।
અસ્ય તુ શૃઙ્ગારાદ્યો ભેદો વિવિધોપધાનવશાત્ ॥ ૮॥

શમરસમભિવિજ્ઞાતું જ્ઞાપયિતું ચાપસન્પ્રગલ્ભન્તે ।
વિષયાશાવશમન્તઃકરણં ન નિયન્તુમીશતે કેઽપિ ॥ ૯॥

કામઃ સ્પૃહા ચ રાગો ગર્વસ્તૃષ્ણા ચ લૌન્યમુત્કણ્ઠા ।
આશા રતિશ્ચ તાપઃ પર્યાયા નિરયદુઃખભેદસ્ય ॥ ૧૦॥

સદસદ્ભાન્તિર્મૂલં લિપ્સોપઘ્નો જરા ચ કાર્પણ્યમ્ ।
દૈન્યાયાસઃ પ્રસવઃ તૃષ્ણાવિષવીરુધઃ ફલં દુઃખમ્ ॥ ૧૧॥

અમૃતં મૃત્યુરિતિ દ્વયમિદમિહ ન મમેતિ યન્મમેત્યપિ ચ ।
ન મમેત્યમૃતં પ્રશમો મમેતિ તૃષ્ણાપરિગ્રહો મૃત્યુઃ ॥ ૧૨॥

અમમત્વસુખોપાયે તૃષ્ણામયશાન્તિપરમસુખે ।
આયસ્યન્વિષયસુખે ગિરિકાગ્રહણે ગિરિં ખનતિ ॥ ૧૩॥

સુખમન્વિચ્છન્ વિષયે તૃષ્ણાં બધ્નાતિ યો મૂઢઃ ।
સન્ધુક્ષતિ સવિધે સઃ જ્વલન્તમગ્નિમુષ્ણાલુઃ ॥ ૧૪॥

કિયદપિ વસુ ચ ક્ષેત્રં પુનરપિ કિયદપિ ચ કિયદપિ ચ ।
ઇત્યખિલં બ્રહ્માણ્ડં કિંયન્તી કેન તૃપ્યતાં તુષ્ણા ॥ ૧૫॥

તૃષ્ણાકાલરજન્યા આધૂના યા નઃ સૃકકોણસ્ય ।
પર્યાપ્તં જગદખિલં તર્પયિતું તાં પ્રભૂયતે કેન ॥ ૧૬॥

હ્રીરપિ જિહ્રેતિ પરં ધૈર્યં કાર્યં વિવશમુપયાતિ ।
સ્વાતન્ત્ર્યમસ્વતન્ત્રં ભવતિ તુ તૃષ્ણાપરિગ્રહો યસ્ય ॥ ૧૭॥

તુલ્યેઽપિ ચાનુબન્ધે મહયતિ વિષયં કદાપિ લઘયતિ વા ।
સ્વચ્છન્દસ્તૃષ્ણાયા લઘયત્યેવાશ્રમં મહાન્તમપિ ॥ ૧૮॥

તૃષ્ણામોહિતચેતાઃ પ્રણમતિ કૃપણઞ્ચ ધનિનમિવ પશ્યન્ ।
ઘૂર્ણતિ સ તયા શૂન્યેઽનવલમ્બેવાત્યયેવ પિઞ્છલવઃ ॥ ૧૯॥

વનમયતે ખનતિ મહીં ગિરિમધિરોહત્યપાં નિધિં વિશતિ ।
પરિચરતિ પાપજાતિં કિમિવ ન તૃષ્ણાતુરઃ કુરુતે ॥ ૨૦॥

પ્રણમતિ કમપિ પ્રલપતિ કિમપિ પ્રકૃતં વચોઽથવાઽત્રકૃતમ્ ।
શિવ શિવ બહુ વિક્રિયતે તૃષ્ણાવિષમજ્વરાતુરો મનુજઃ ॥ ૨૧॥

અસ્પૃશ્યમપિ પદેન સ્પૃશતિ પદે ગાઢનમિતસકલાઙ્ગઃ ।
દર્શયતિ દીનભાવં ગ્રસ્તસ્તૃષ્ણાપિશાચિકયા ॥ ૨૨॥

વ્યાલાચરિતેઽપિ વને હિતતૃણચારી મૃગોઽપિ વરમ્ ।
તં તુ ધિગનુધનિનં યઃ સ્વોદરભરણાય સહતિ સન્તાપમ્ ॥ ૨૩॥

ઈષદ્ગ્રાહં ગહનં ઘોરં વારાશિમાશયા વિશતઃ ।
કષ્ટમિદં તુ યદગ્રે તિષ્ઠતિ કૃપણો દુરીશસ્ય ॥ ૨૪॥

શ્લથમિવ સિચયં ગ્રથયન્ અઙ્ગે લગ્નમિવ કિમપિ સમ્માર્જન્ ।
અનભિમતમેવ ધનિનો વિક્રિયતે હન્ત તૃષ્ણયા ક્રાન્તઃ ॥ ૨૫॥

દેવ સ્વામિન્નાર્ય પ્રસીદ નાથેતિ નેશ્વરં ન ગુરુમ્ ।
શિવ શિવ જઠરબુભૂષા કૈષા કાપુરુષમાહ કિં ધનિકમ્ ॥ ૨૬॥

પશ્યત્યન્યં ધનિકે કથયતિ ચાન્યેન ધનમદસ્ખલિતમ્ ।
પશ્ય બલં તૃષ્ણાયાઃ સ્વયમયમનુમોદતે કસ્માત્ ॥ ૨૭॥

બહુચાટુરટન્ધનકો ધનિકેનાકર્ણિતાવધીરણયા ।
પશ્ય ફલં તૃષ્ણાયા વ્હીણો દીનશ્ચ ભર્ત્સ્યતે સકલૈઃ ॥ ૨૮॥

અવનતિમધિકામઞ્જલિમશ્લથબન્ધં સમસ્તરદ વિવૃતિમ્ ।
દુર્ધનિકે દૈન્યોક્તસ્તૃષ્ણૈકા શિક્ષયત્યુપાધ્યાયા ॥ ૨૯॥

તિર્યક્પ્રેક્ષિણિ પુરુષે ભયતરલાક્ષઃ સ્વદૈન્યવિનિવેદી ।
કૃચ્છ્રં જીવતિ કૃપણો ધિક્કષ્ટં તૃષ્ણિકા વિડમ્બયતિ ॥ ૩૦॥

નાટ્યાનુરઞ્જનાય નાપિ મહેશાનસમ્પ્રસાદાય ।
ન પૃથગ્જનકુતુકાય ચ નાનાભિનયૈશ્ચ નટતિ કિં કૃપણઃ ॥ ૩૧॥

કૃપણોઽભિનયતિ કરુણં દીનવચઃ પ્રણતિદૃષ્ટિચાપલ્યૈઃ ।
પુષ્યતિ રૌદ્રં ધનિકો બીભત્સં પ્રેક્ષકસ્તુ હાસ્યમપિ ॥ ૩૨॥

અન્વયમુન્નતમભિજનમખિલકલાકૌશલશ્ચ સાર્વજ્ઞ્યમ્ ।
તૃષ્ણૈકા નૃપતિસમે પ્રહસનનટનાઙ્ગહારયતિ ॥ ૩૩॥

ઉપસર્પત્યપસર્પતિ વક્તુમિવ પ્રસ્તુવંશ્ચ વિભ્યદિવ ।
ઉત્તિષ્ઠત્યુપવિશતિ ચ તૃષ્ણાવિવશઃ કિયન્નૃપે નટતિ ॥ ૩૪॥

ન સ્વસ્ય ચ ન સ્વાનાં શામ્યતિ તૃષ્ણાજ્વરોત્કલિકા ।
કિં સેવન્તે કૃપણા ભૂપતિરિતિ સઞ્ચરત્પ્રેતમ્ ॥ ૩૫॥

આસ્તામર્થિજનોઽયં સ્વીયજને વા કિયત્કદોપકૃતમ્ ।
નૃપતિં નિહીનવૃત્ત્યા સેવન્તે હન્ત તૃષ્ણયૈવ હતાઃ ॥ ૩૬॥

નરપતિરાલોકિષ્ટ સ્મયતે સ્મ પ્રત્યવેક્ષ્ય મામદ્ય ।
ઇતિ તૃષ્ણાવિવશમતિર્નિસ્ત્રપમનુભાષતે સદસિ ॥ ૩૭॥

કિમતઃ કુમ્ભીપાકે યદિ વદનં દૃશ્યતે દુરીશસ્ય ।
આત્મમ્ભરિમમુમપિ શ્રયતે તૃષ્ણાઽઽતુરન્તુ ધિગ્ધિક્તમ્ ॥ ૩૮॥

નરપત્યન્તરવેદ્યૈઃ દત્તાયુર્વાહ્યચેટિકામપિ યત્ ।

કૃપણો નાથતિ નૃપતેર્નિવેદયેતીહ કિન્વિતો વીચેઃ ॥ ૩૯॥

ધનપતિહતકસ્ય પુરઃ શ્વજાતિલલિતં ચિરં ચરન્નન્તઃ ।
સર્વસ્યેષ્ટ ઇવ બહિસ્તૃષ્ણાનિહતોઽખિલે કરોતુ સ કિમ્ ॥ ૪૦॥

યદ્રાજાનં વશયતિ યત્પરિજનમસ્ય સાન્ત્વયતિ ।
યદ પત્રપતે ચાન્તર્ભાવી લાભસ્સ કસ્ય સમઃ ॥ ૪૧॥

કતિ કતિ પરહિતરહિતાઃ કુક્ષિમ્ભરયો ન ધનિગૃહશ્વાનઃ ।
ઉપતાનપિ બત કૃપણાસ્તે ચાઢ્યં તેષુ સન્તિ કિં બ્રૂમઃ ॥ ૪૨॥

રાજા સ તવ મમ ત્વં ત્વદધીના વયમિહેતિ નૃપચેટમ્ ।
અનુનાથતિ કૃપણં યત્ કિઞ્ચિદિહ લભ્યેત કિન્ન જાનીમઃ ॥ ૪૩॥

બ્રહ્માણ્ડં કિયદેતત્ કિયતી ચાસ્મિન્વસુન્ધરા સકલા ।
તત્રાસઙ્ખ્યા ભૂપાઃ કૃપણાસ્તે કિન્નુ દદતુ કૃપણાય ॥ ૪૪॥

કણમપિ દદતમુદારં કૃપણં તદ્દાનતો મનુતે ।
કૃપણોઽયં કિમસાવિતિ તૂલયતિ તૃષ્ણા મિથઃ પશ્ય ॥ ૪૫॥

આજીવન્નતિસૃષ્ટં કિયદપિ દદતં મિતમ્પચં બ્રૂતે ।
ચર્વન્નૃજીષમિક્ષોઃ કૃપણં નિષ્ઠીવિનં ક્ષિપન્નિવ સઃ ॥ ૪૬॥

સમ્પદમુષ્ય સમગ્રા ગહનમધૂદુમ્બરો ભૃશં ફલિતઃ ।
કિયતામપ્યાજીવો નિહ્નુમહે નાન્તરસ્ય યદિ શઙ્કાઃ ॥ ૪૭॥

સમ્પદમુષ્ય સમગ્રા કિમ્પાકઃ કાનને ભૃશં ફલિતઃ ।
કિયતામપ્યાજીવો નહિ નહિ શોભૈવ પશ્યતાં દૂરે ॥ ૪૮॥

અનલમ્બુદ્ધિસ્તૃષ્ણા તત્કાર્પણ્યં તદેવ દારિદ્ર્યમ્ ।
આલોકેશસ્તમ્બં તુલ્યમિદં તત્ર કસ્ય કા સમ્પત્ ॥ ૪૯॥

અજિરે સુરતરુવાટે ગોષ્ઠે સુરભિવ્રજો ગૃહારામે ।
ચિન્તામણિરવનિગિરયઃ કિમલમ્મતિરસ્તિ સત્યમીરયત ॥ ૫૦॥

પરતૃષ્ણાસમવાયાત્ ઈર્ષ્યાવિષયોપરોધતઃ ક્રોધઃ ।
ઉદ્યમભઙ્ગાદાધિર્દૈ લવિધિનેવ કન્દલતિ તૃષ્ણા ॥ ૫૧॥

વલ્ગતિ તૃષ્ણાવિષયે યસ્યા ભાવં મમત્વમુત્કુરુતે ।
પશ્ય તયોઃ કાર્કશ્યં યદયમસન્નેવ સંરુજતિ ॥ ૫૨॥

ગર્ધયતિ વર્ધમાના ગુણમિવ વિષયેષુ પુષ્ણતી તૃષ્ણા ।
તે પુનરનયા મૃષ્ટા દૃષ્ટા દૃષ્ટિવિષવિષધરાયન્તે ॥ ૫૩॥

નૃપચોરાદેરર્થે રોગવિયોગાદિતો ભોગે ।
મૃત્યુજ્વરાદ્દેહે ભક્તં ક્લિશ્નાતિ ભયમયી તૃષ્ણા ॥ ૫૪॥

પ્રાણપરિત્રાણાય પ્રાયઃ પ્રાણ્યર્થતૃષ્ણયા હ્રિયતે ।
પશ્ય વિપર્યયમમુયા રઞ્જિતહૃદયો રણાઙ્ગણં વિશતિ ॥ ૫૫॥

યદિ તૃષ્ણામુદ્રણયેત્ યદિ વાઽમર્ષ ભયં વિષાદં વા
મા ભૂત્પદમૈન્દ્રં વા વૈધં વા વૈરિણામપિ ચ ॥ ૫૬॥

વિષયાધિગમે ભઙ્ગો નિર્વેદો વિષય દોષ સમ્બોધઃ ।
લબ્ધવ્યાન્તરવિરહઃ પ્રાયસ્તૃષ્ણાધિશમસુખોપાયઃ ॥ ૫૭॥

પ્રકૃતિરિયં તૃષ્ણાયાઃ લાભે લાભે વિવર્ધતે વિયતઃ ।
ભગ્નોદ્યમભૂયિષ્ઠા ક્ષીયત હીણે વશમસુખં સૂતે ॥ ૫૮॥

કિયદપિ લબ્ધં લબ્ધં તૃષ્ણોપેક્ષા તુ લબ્ધલબ્ધવ્યે ।
આદ્યોદ્વેગવહાન્યા શાન્તરસપ્રાણવહનાડી ॥ ૫૯।
તૃષ્ણા યદિ કિં નિરયે દવદાહમયં યયૈવ જગદખિલમ્ ।
શાન્તિર્યદિ કિન્વમૃતે યયૈવ ચન્દ્રાતપાયતે વિશ્વમ્ ॥ ૬૦॥।

અન્તઃકરણે શાન્તે કાન્તં જગદિન્દુશીકરૈકાન્તમ્ ।
તૃષ્ણાવિષાનલોષ્મે સકલં કાલાનલોષ્મલં ભીષ્મમ્ ॥ ૬૧॥

અર્થાનથવા કામાન્ આશાસ્તે તૃષ્ણયા યસ્માત્ ।
યદુપક્રમમસ્યામી સ એવ ધર્મઃ સ્વયં સેવ્યઃ ॥ ૬૨॥

અર્થેઽથવાપિ કામે યામનુબધ્નન્ સદા તપતિ ।
તદુપશમે તાં તૃષ્ણાં બદ્ધ્વા સદ્યઃ સુખી ભવતિ ॥ ૬૩॥

પુષ્ણાત્યનર્થજાલં તૃષ્ણૈકા સત્યમન્યદાસ્થાભૂઃ ।
શમવિષયા પુનરેષા કતકરજોન્યાયમનુસરતે ॥ ૬૪॥

ન ધનેન ક્રેતવ્યા નાપિ ચ ગિરિગહ્વરે વિચેતવ્યા ।
નિર્વિણ્ણે કરણગણે જોષં યા સા દશા શાન્તિઃ ॥ ૬૫॥

ન શરીરસ્યાયાસો ન ચ કાપિ ગ્લાનિરિન્દ્રિયગણસ્ય ।
ન ચ હૃદયસ્ય વિષાદઃ શમસુખસમ્પત્તિસુકરતાં પશ્ય ॥ ૬૬॥

તચ્છાસ્ત્રં સ વિવેકઃ સા વિદ્યા સા ક્રિયા વિનાવદ્યા ।
દર્શયતિ નિર્વિમર્શં શાન્તરસસ્રોતસો યદિ પ્રસરમ્ ॥ ૬૭॥

સ વિવેકો નવિવેકો યેન હિ વિષયેષુ સદસદાદિમયઃ ।
ઇદમદ ઇતિ વિવેકઃ કૃમિકીટાદેરપિ પ્રકટઃ ॥ ૬૮॥

આશાવૈવશ્યમલં શમયિતુમનલં પ્રયસ્યતો યસ્યઃ ।
તસ્ય ચ યોગાભ્યાસઃ કેવલબુસરાશિચર્વણાયાસઃ ॥ ૬૯॥

આશા પરમાયાસઃ સ્વામ્યં વૈષમ્યમન્તરઙ્ગસ્ય ।
ભોગશ્ચ રોગયોગઃ શાન્તરસપ્રવણચેતસો ભાતિ ॥ ૭૦॥

ગાઢનિમગ્નો વિષયે દુઃખૈરપિ યો વરં સુખી મૂઢઃ ।
ઉષ્ટ્ર ઇવ લગુડઘાતૈઃ શાન્તો ન ત્વક્ષિપાત્રમિવ ખેદી ॥ ૭૧॥

અનુહૃષ્યતિ નોપેતં નાપેતં વાપિ કિઞ્ચિદનુતપતિ ।
પશ્ય વિરાગૌદાર્યં શાન્તરસાસ્વાદશીતલસ્વાન્તમ્ ॥ ૭૨॥

કબલયતુ કાલદહનો વિશ્વં સપ્તાર્ણવી વિલાપયતુ ।
ઉદ્ઘૂર્ણયતુ મરુદ્ગણ ઉદ્દિશમો નેઙ્ગતે કિઞ્ચિત્ ॥ ૭૩॥

વિધ્યણ્ડેऽપિ વ્યતિયતિ શાન્તરસાસ્વાદસાદિતોદ્વેગઃ ।
અમ્ભોનિધિગમ્ભીરો ધીરમુદાસ્તે મુદા પરં ધન્યઃ ॥ ૭૪॥

ઉદ્વેજયત્વસાધુઃ સાધુસ્સાધું પ્રપૂજયતુ ।
એજયતુ કોऽપિ ચપલઃ સર્વસમશ્શમપરો જયતિ ॥ ૭૫॥

લિમ્પતુ ચન્દનપઙ્કૈરઙ્ગં વાસ્યા વિલુમ્પતુ વા ।
નાશંસતિ કલ્યાણં નાકલ્યાણં તથા શાન્તઃ ॥ ૭૬॥

ઉપતિષ્ઠન્તાં વિષયા ઘનાઘના વાથ સમ્પ્રતિષ્ઠન્તામ્ ।
ઉપશાન્તસ્ય કિમેતૈરન્તરમથવાન્તરિક્ષસ્ય ॥ ૭૭॥

તસ્ય કિમીશતયા વા બ્રહ્મત્વેનાથ વા મહેન્દ્રતયા ।
દૈન્યનિદાનં તૃષ્ણા દહનજ્વાલેવ યદિ પુનશ્શાન્તા ॥ ૭૮॥

ઉપદાભિરાત્મલોકૈરુપતિષ્ઠન્તાં તમવસરપ્રેક્ષાઃ ।
બ્રહ્માદ્યાઃ કિમમીભિઃ શાન્તિપરૈશ્વર્યમીયુષો વિદુષઃ ॥ ૭૯॥

બ્રહ્મેતિ ન બહુ મનુતે શ્વસૂકરાદીતિ વિમનુતે નાપિ ।
સમમનુપશ્યન્નાસ્તે તુષ્ટઃ સ્વેનૈવ કેવલં શાન્તઃ ॥ ૮૦॥

સબ્રહ્મકાસ્સુરા ગિરિશિખરગતસ્યેવ ભૂચરાઃ કૃમયઃ ।
કેઽમી ભૂપાપશદાઃ શાન્તિપદે શાશ્વતેઽભિષિક્તસ્ય ॥ ૮૧॥

કિં બ્રહ્મા કિં મશકો મર્તવ્યે મહતિ કાલપરિવર્તે ।
કિં મેરુઃ કિમણુર્વા મઙ્ક્તવ્યે સતિ મહાર્ણવાવર્તે ॥ ૮૨॥

અમૃતં વાસ્તુ તૃણં વા યદ્યશિતેનૈવ તેન તૃપ્યેયુઃ ।
દેવાઃ કિં કૃમયઃ કિં જ્વલદશનાયામયે તુલ્યે ॥ ૮૩॥

યોગાય ન ચેત્તનુરિયમસુલભ એવામનોહતેર્ભોગઃ ।
દોહાય ન વાહાય ન કિમસૌ વન્ધ્યેવ પુષ્યતે કરભા ॥ ૮૪॥

ભ્રૂભઙ્ગકેલિકલિતે વક્ત્રાવર્તે ભ્રમન્તિ વનિતાનામ્ ।
બહુતટમવિવેકહતાઃ કુલાચલા ઇવ તુ નિચલા ધીરાઃ ॥ ૮૫॥

ત્વઙ્માંસમસ્થિકેશા બીભત્સ્યન્તે વિભક્તદૃષ્ટાનિ ।
સમવાયિષુ તેષુ કુતો વનિતા વનિતેતિ દુર્ધિયો મોહઃ ॥ ૮૬॥

સ્થાનં કિમસ્ય બીજં કિં કિમુપષ્ટમ્ભકં કિમન્તર્વા ।
ઇત્યવિમૃશ્ય બહિર્હક્ કાન્તા કાન્તેતિ મુહ્યતિ મુધૈવ ॥ ૮૭॥

અન્વક્ષં યદનુક્ષણમક્ષાલિતમાસ્રવન્મલૈર્વિસ્રમ્ ।
તસ્મિઞ્જુગુપ્સિતવ્યે મલભાણ્ડે માનિનીતિ કિં ત્વેતત્ ॥ ૮૮॥

હરિચન્દનમિતિ સુરભિલમાલેતિ મનોજ્ઞવાટીતિ ।
વનિતાતનુકેશાસ્યે દુર્ગન્ધં પિદધદેવ મુહ્યતિ કિમ્ ॥ ૮૯॥

વદનં યદમૃતકર ઇતિ નયનં યચ્ચાપિ નીલનલિનમિતિ ।
કનકલતેતિ યદઙ્ગં તદેવ નિધને તનોઃ કથં પશ્ય ॥ ૯૦॥

અમૃતાવયવશરીરા બાલા ચાન્દ્રી કલેવ નિર્ગલિતા ।
આપ્યાયત્યપાઙ્ગૈરિતિ મુહ્યતિ પશ્ય કસ્ય કો યોગઃ ॥ ૯૧॥

આલમ્બિતમાલિઙ્ગિતમાઘ્રાતઞ્ચાનુચુમ્બિતઞ્ચાપિ ।
ઉપભુક્તમઙ્ગનાઙ્ગં કિમલ મોહશ્રમાદન્યત્ ॥ ૯૨॥

કણ્ડૂતિનોદનં વા કામાનલવેગસંશમો વાપિ ।
ઉભયોરુભયં તુલ્યં કિમયં સ્વયમેવ કિઙ્કરઃ સ્ત્રીણામ્ ॥ ૯૩॥

મેદોવુદમક્ષ્યુત્પલમસ્થિવિવારં મૃદુસ્મિતં જ્યોત્સ્ના ।

લાલામધરામૃતમિતિ કવિભિર્મહયદ્ભિરાહતો લોકઃ ॥ ૯૪॥

યદપાઙ્ગલેશસઙ્ગાદઙ્ગમુપાઙ્ગં જુગુપ્સનીયમપિ ।
મઙ્ગલમિવાઙ્ગનાનાં તમનઙ્ગં બ્રૂમહે જગન્મોહમ્ ॥ ૯૫॥

કાલવ્યાલિદંષ્ટ્રા ક્ષુરધારા ક્ષુદ્રરાજમૈત્રી ચ ।
એકત્રૈકત્ર વધૂરિયમથવૈકાતિરિચ્યતે સકલાત્ ॥ ૯૬॥

કુટિલાસ્સર્વે ભાવાઃ કુન્તલજાલે કુતઃ કવેર્નિષ્ઠા ॥

કર્કશમન્તઃકરણં તર્કય યુવતેરુત સ્તનગ્રન્થી ॥ ૯૭॥

વદિતુન્ન પ્રભવામો વનિતા યાસ્સન્તુ તાસ્સન્તુ ।
મૂર્વાભિર્માયાભિઃ મુમુક્ષતામસ્ત્વલન્તાભિઃ ॥ ૯૮॥

સંસૃતિનિરયસરણ્યાં મોહાન્તર્દાહસન્ધમધમન્યા ।
મુક્તિદ્વારાર્ગલયા ગલનિગલે નાલમઙ્ગનયા ॥ ૯૯॥

સાહસસઙ્કેતભ્રુવા ચપલચાપલ્યચાટુશિક્ષિકયા ।
મલમણિમઞ્જૂષિકયા ચિરમલમુદ્બદ્ધપાશ્યયાઙ્ગનયા ॥ ૧૦૦॥

રાગોદ્રેચિતપૂયક્લિન્ને નાડીવ્રણે કૃમિક્ષીણે ।
પુત્રઃ પુત્ર ઇતીમે લોકા બમ્ભ્રમતિ સમ્ભ્રમેણ કિયત્ ॥ ૧૦૧॥

ઉપરુન્ધન કુશલં સ્વં પુત્રં મિત્રં કલત્રમિતિ ।
પશ્યતિ કિં પાથેયં પરલોકપ્રસ્થિતો યદા ભવતિ ॥ ૧૦૨॥

અભ્યસ્યામો વિદ્યાં વિષયાનુપભુઞ્જ્મહેઽથ શામ્યામઃ ।
કુર્મો યથાભિલષિતં ક્રૂરો મૃત્યુસ્તુ ન ક્ષણં કુરુતે ॥ ૧૦૩॥

વૃદ્ધૌ માતાપિતરૌ સાધ્વી ભાર્યા સુતશ્શિશુરકાર્યૈઃ ।
અપિ ભાર્યા ઇત્યન્ધસ્સ્વયં પતન્તન્નિપાતયત્યન્ધમ્ ॥ ૧૦૪॥

લાભો બહુલાયાસો લબ્ધસ્યાધિર્વ્યયેઽથવા નાશે ।
કિન્ન ધનાશા દુઃખં ભોગાપગતં ચ યત્તદનુતપતિ ॥ ૧૦૫॥

સત્યં લભ્યે લબ્ધે કિમપિ સુખં તત્ર ભુક્તનષ્ટેઽપિ ।
યદ્દુખં તદરુન્તુદમામૃત્યોર્દહતિ કોટરાગ્નિરિવ ॥ ૧૦૬॥

નાર્જનરક્ષાયાસો ન વ્યયનાશાદિશઙ્કયાતઙ્કઃ ।
નિત્યસુખૈકનિધાનં ધનમાકિઞ્ચન્યમન્યદેવ સતામ્ ॥ ૧૦૭॥

હાલાહલવાહિન્યા બલવદ્દુન્યાં સ શમયિતું ઘટતે ।
કિમ્પાકૈરશનાયાં સુખાય મૂઢો ધનાય યતતે યઃ ॥ ૧૦૮॥

દારા હૃદયવિદારાઃ સુતાસ્સતાઞ્ચૈવમસુતરાધિકરાઃ ।
ધનમપિ સન્તતનિધનં પારિવ્રાજ્યં સુખૈકસામ્રાજ્યમ્ ॥ ૧૦૯॥

ધનવાનસ્મીતિ મદઃ કિયતાપિ ધનેન કૃચ્છ્રલબ્ધેન ।
તદપાયે મૃતિમૂર્ચ્છા તદનિચ્છૈવ ત્વનિચ્છતોઽપ્યમૃતમ્ ॥ ૧૧૦॥

વિષયપરિગ્રહમૂલા વર્ષાવધિકાપગા ઇવોત્કૂલાઃ ।
પ્રવહન્ત્યાપન્નધો યાસ્વાશાપાશિતા વિપદ્યન્તે ॥ ૧૧૧॥

આમજ્ઞો જિજ્ઞાસિતમુદ્ગ્રાહ્યો ગ્રાહિતં મિથોઽવધૃતમ્ ।
સર્વાશસંશાન્તિનર્ત્તે વિનિવર્તતે ભવાવર્તઃ ॥ ૧૧૨॥

કિં યાગૈઃ કિમુ યોગૈઃ કિં વા ભૂમિપ્રદક્ષિણક્રમણૈઃ ।
હૃદિ યદિ રૂઢા શાન્તિર્યદિ વાશા કિન્નુ તૈરેવ ॥ ૧૧૩॥

ધર્માય કુશલમસ્તુ સ્મર્તુમનર્થાત્મનો વિભેમ્યર્થાન્ ।
ધિક્કામાનસુખમયાન્ અધુના વિશ્રમિતુમસ્મિ શાન્તિપદે ॥ ૧૧૪॥

યે કેઽપ્યાન્તરબાહ્યાઃ સુખહેતોરનુસૃતાઃ ક્રિયાયોગાઃ ।
તાનનુજાનામ્યધુના વિશ્રાન્તો નિયતમેવ શાન્તિપદે ॥ ૧૧૫॥

આ દ્રુહિણાદા ચ કૃમેરક્રમિકા કાલિકેઽપિ સુખઃદુઃખે ।
અંહો પશ્યત મોહં ક્ષણં પ્રસીદતિ જનો વિષીદતિ ચ ॥ ૧૧૬॥

ભદ્રમભદ્રં વા નઃ કર્મ વિનિર્માતુ કામતો જન્મ ।
અશ્રાન્તં શાન્તિપદે વિશ્રાન્તં સ્યાદ્યદિ સ્વાન્તમ્ ॥ ૧૧૭॥

દિવ્યનદી કુનદી વેત્યાર્યાવર્તોઽથ કીકટો વેતિ ।
તાવદ્વિકલ્પમોહો યાવન્નેત પાવનીં શાન્તિમ્ ॥ ૧૧૮॥

પુણ્યમિદં તીર્થમદઃ પુણ્યતમશ્ચેતિ યશ્ચરતુ ચશ્ચાઃ ।
પ્રાયો દેશાતિથયઃ શાન્તસ્યાત્મૈવ તીર્થમમૃતમયમ્ ॥ ૧૧૯॥

કિં પુષ્કરં પ્રયાગઃ કિં વા ગઙ્ગાબ્ધિસઙ્ગમો વાપિ ।
બહિરનુ વિમૃશત્યંહો નાત્માનં તીર્થમખિલતાપકરમ્ ॥ ૧૨૦॥

કર્તવ્યમકર્તવ્યં પ્રતિકર્તવ્યમિતિ વિભ્રમવિકલ્પૈઃ ।
અલમલમાયાસફલૈરન્તર્વિશ્રાન્તિમેમિ શાન્તિપદે ॥ ૧૨૧॥

સાધિતમનયા તન્વા ભવમરુપથચારવિભ્રમસ્થાનમ્ ।
અલમલમમુયા ભૂયઃ કૃતઘ્નતેયં તુ મર્ષણીયા નઃ ॥ ૧૨૨॥

આશ્વાસિતમખિલેન્દ્રિયમાનન્દિતમન્તરઙ્ગમતરઙ્ગમ્ ।
બહ્વન્ના જીવકલા કિં બ્રૂમઃ શમરસામૃતાસ્વાદમ્ ॥ ૧૨૩॥

ઉપશાન્તાસ્સન્તાપાઃ શારીરા માનસાશ્ચ યે ચાન્યે ।
કૈરપિ સુકૃતૈરધુના શાન્તિસુખાબ્ધૌ વિહરતિ સ્વાન્તમ્ ॥

(વિહરતિ હૃદયં શમામૃતામ્બુનિધૌ )॥ ૧૨૪॥

યેષાં પક્ષવિપક્ષૌ ન સ્તો નાપિ પ્રિયાપ્રિયે મહતામ્ ।
નાપિ ચ હર્ષવિષાદૌ તે શાન્તાસ્તાન્નમસ્યામઃ ॥ ૧૨૫॥

ઊહાસહમુપરિપ્લવમુપચિતસન્દેહમુન્મિષન્મોહમ્ ।
ચ્યુતપૂર્વપરક્રમકં જ્ઞાનં યેષામિમેષિ હું ગુરવઃ ॥ ૧૨૬॥

અવ્યાહતં વ્યવહિતેપ્યતિસૂક્ષ્મેઽપિ સ્ફુટોત્તરસ્ફુરણમ્ ।
અક્રામિકસકલવિષયં જ્ઞાનં મહતાં નિરઞ્જનં જયતિ ॥ ૧૨૭॥

ઇતિ શાસ્ત્રસુધામ્બુધિં મથિત્વા પ્રતિલબ્ધં પ્રશમામૃતં નિષીય ।
અવધૂતભવામયાધિવાધા વિબુધા નિર્ગુણતાજરામરાશ્ચ ॥ ૧૨૮॥

વાસુદેવેન્દ્ર યોગીન્દ્રચરણામ્બુજરેણુના ।
કૃષ્ણાનન્દેન યમિના પ્રણીતં પ્રશમામૃતમ્ ।

ઇતિ કૃષ્ણાનન્દકૃતિષુ પ્રશમામૃતં સમ્પૂર્ણમ્ ॥

Notes:
Ambrosia of tranquility longest of the nine works by Krishnananda describing the blissful nature of a stage when the mind is completely checked from its frivolous tendencies, though not annihilated and made receptive of the blissful nature of the Atman, the dearest and the supreme object of love of all the living creatures. (beings). It consists of 128 verses.

Proofread by Rajesh Thyagarajan

*Prashamamritam*

pdf was typeset on November 6, 2025

Please send corrections to *sanskrit@cheerful.com*